पूरक 2019 1282

Roll No. ........................

Total No. of Pages : 8

Total No. of Questions : 16

उत्तरमध्यमा द्वितीयखण्ड

**विषय कोड : 801**

अनिवार्यसंस्कृतम्

प्रथम-प्रश्नपत्रम्

समय : 3 घण्टे

पूर्णांक : 100

---

**निर्देश :— सर्वे** प्रश्नाः अनिवार्याः। प्रश्नाः खण्डत्रये विभक्ताः।

**(खण्ड 'अ')**

**(सर्वेषां कृते)**

1. उचितं विकल्पं चित्वा लिखत — $5\times1=5$

(*i*) "स्वप्नवासवदत्तम्" नाटकस्य रचयिता अस्ति :

(अ) महाकविः कालिदासः (ब) महाकविः भवभूतिः

(स) पंडितराज जगन्नाथः (द) महाकविः भासः

(*ii*) कति पुरुष पात्राणि सन्ति स्वप्नवासवदत्त नाटके ?

(अ) द्वौ (ब) षड्

(स) अष्टौ (द) दश

(*iii*) उदयनः अस्ति —

(अ) मन्त्री (ब) महामन्त्री

(स) अमात्यः (द) राज्ञः



714

(*iv*) उदयनस्य पितुर्नाम किमासीत् ?

(अ) महासेनः (ब) उग्रसेनः

(स) यौगन्धरायणः (द) बलरामः

(*v*) पद्मावती का विद्यते ?

(अ) महाराज उदयनस्य भगिनि (ब) महाराज उदयनस्य द्वितीया पत्नी

(स) महाराज उदयनस्य प्रथमा पत्नी (द) महाराज उदयनस्य धात्री

2. रिक्तस्थानानि पूरयत : $2 \times 3 = 6$

(सुलभा, जगतः, युजौ)

(क) कालक्रमेण ................................ परिवर्तमाना।

(ख) कर्त्तारः ................................ लोके ।

(ग) पद्मावतीर्णपूर्णौवसन्तकभ्रौ ................................ पाताम्।

3. युग्ममेलनं कुरुत : $2 \times 4 = 8$

| | |
|---|---|
| (क) वैदेही पुत्रः | विदूषकः |
| (ख) वसुन्धरा | भटः |
| (ग) मगधराजस्यभृत्यः | वासवदत्तायाः धात्री |
| (घ) वसन्तकः | उदयनः |



715

4. एकपदेन उत्तरं लिखत : 2×4=8

(क) राज्ञो प्रद्योतस्य पुत्र्यासीत ?

(ख) अङ्गारकवती कस्य पत्न्यासीत् ?

(ग) पद्मावत्याः सहचरी का विद्यते ?

(घ) उदयनः कीदृशो नायकः ?

5. सूक्तिरेका सप्रसङ्गं व्याख्येया – 1×8=8

"प्रद्वेषो बहुमानो व संकल्पादुपजायते।"

**अथवा**

"कालक्रमेण जगतः परिवर्तमाना,

चक्रारपङ्क्तिरिव गच्छति भाग्यपंङ्तिः।"

6. संस्कृतेन उत्तरं लिखत : 1×5=5

(क) न्यासस्य रक्षणं कीदृग् भवति ?

(ख) घोषवती कस्याः नाम ?

(ग) वत्सदेशस्य राजा कः वर्तते ?

(घ) विजया का विद्यते ?

(ङ) वासवदत्ता नाटकस्य प्रथमेऽङ्के कति श्लोकाः सन्ति ?



716

7. निम्नलिखितेषु कयोश्चित **द्वयोः** पद्ययोः सप्रसङ्ग व्याख्या कार्या – 2×5=10

(अ) भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः।

धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः।।

**अथवा**

मधुमदकला मधुकरा मदनार्ताभिः प्रयाभिरूपगूढ़ाः।

पादन्यासविषण्णा वयमिव कान्तावियुक्ताः शयुः।।

(ब) तीर्थोदकानि समिधः कुसुमानि दर्भान्

स्वैरं वनादुपनयन्तु तपोधनानि।

धर्मप्रिया नृपसुता न हि धर्मपीडा-

मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः।।

**अथवा**

कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।

प्रायेण हि नरेन्द्र श्रीः सोत्साहेरेव भुज्यते।।



717

## (खण्ड 'ब')

### (व्याकरणछात्राणां कृते न्यायसिद्धान्तमुक्तावल्यां प्रश्नाः)

8. **एक**पदेन उत्तरत – 10×1=10

(*i*) परीक्षायाः कि लक्षणम् ?

(*ii*) कति पदार्थाः ?

(*iii*) कालस्य लक्षणम् किम् ?

(*iv*) रसस्य लक्षणं किम् ?

(*v*) गन्धस्य लक्षणं किम् ?

(*vi*) चक्षुषा घट प्रत्यक्षजनने कः सन्निकर्षः ?

(*vii*) रसः कतिविधः ?

(*viii*) लिङ्गं कतिविधम् ?

(*ix*) अपां शरीरं कुत्र ?

(*x*) कालः कतिविधः ?

9. लघूत्तरीयाः प्रश्नाः (केचन **त्रयः** समाधेयाः) – 3×5=15

(*i*) पदार्थभेदाः सपदकृत्यं लिखत।

(*ii*) संयोग लक्षणं सपदकृत्यं लिखत।

(*iii*) किं लक्षणं अपां तद्भेदाश्च लिखत।

(*iv*) तच्च शुक्ल-नील-पीत-रक्त.................सप्त विधम्। रिक्तस्थान पूर्तिं कुरुत।



718

10. न्यायसिद्धान्तमुक्तावल्या: केचन **पञ्च** प्रश्ना: समाधेया: – 5×5=25

(*i*) वर्ण: शुक्लोरस:................................ मुदाहृतम्। (रिक्त स्थान पूर्तिं कुरुत)।

(*ii*) "कालनिरूपणम्" व्याख्येय:।

(*iii*) "आत्मनिरूपणम्" एतस्य कारिका लिखत।

(*iv*) "अनुभूतिनिरूपणम्" व्याख्यताम्।

(*v*) "अलौकिक व्यापार: – कतिविधं: लिखत।

(*vi*) क्रियां जातिं योग्यवृतिं समवायं च तादृशम्।

गृह्णाति चक्षु: सम्बन्धादालोकोदभूतरूपयो:।। अस्य कारिकां लिखत।

**(खण्ड 'स')**

**(व्याकरणेतरच्छात्राणां कृते लघुसिद्धान्तकौमुद्या: प्रश्ना:)**

11. **रिक्तस्थानं पूरयत :** 1×5=5

(चतुर्दश: द्वन्द्व:, स्वतंत्र:, द्वितीय: वरदराजाचार्य:)

(*i*) कर्ता भवति............................।

(*ii*) माहेश्वर सूत्राणि भवन्ति................................।

(*iii*) समाहारे........................समास: भवति।

(*iv*) लघुसिद्धान्तकौमुद्या: लेखक: ............................ अस्ति।

(*v*) कर्मणि................................।



714

12. युग्ममेलनं कुरुत : 1×5=5

| | | | |
|---|---|---|---|
| (*i*) | अपादाने | – | करणम् |
| (*ii*) | साधकतमं | – | स्वाहा |
| (*iii*) | अग्नये | – | पंचमी |
| (*iv*) | समासः | – | लृट |
| (*v*) | अभिज्ञानवचने | – | पञ्चधा। |

13. केचन **पञ्च** प्रश्नाः समाधेयाः । 5×2=10

(*i*) हेतु हेतुमतोः कः लकारः भवति ?

(*ii*) "कारकः" इत्यत्र अकादेशविधायकसूत्रं किमस्ति ?

(*iii*) द्वन्द्वसमास विधायकं सूत्रं लिखत।

(*iv*) प्रथमा विभक्ति विधायकसूत्रं लिखत।

(*v*) सम्प्रदानविधायकं सूत्रं लिखत।

14. ग्रंथरीत्या केचन **पञ्च** प्रयोगाः साधयत् – 5×4=20

(*i*) हरिं भजति

(*ii*) भावयति

(*iii*) भाव्यते

(*iv*) तापते

(*v*) दायिता

(*vi*) दैव्यम्

(*vii*) दैव्यः।



720

15. केचन **पञ्च** प्रश्नाः समाधेयाः – 1×5=5

(*i*) समासस्य किं लक्षणम् ?

(*ii*) विग्रहस्य किं लक्षणम् ?

(*iii*) ढक् प्रत्ययस्य उदाहरणम् किम् ?

(*iv*) 'वाग्मी' इत्यस्य सिद्धिः केन सूत्रेण भवति ?

(*v*) यलोप विधि सूत्रम् किम् ?

(*vi*) शैवः गाङ्गः एते उदाहरणे केन सूत्रेण सिद्ध्यते ?

(*vii*) 'शब्दायते' इत्यत्र कः प्रत्ययः ?

16. सूत्रं पूरयत् – 5

(*i*) अव्ययीभावे चाकाले सहस्य सः .............................. मधीते साग्नि।

**अथवा**

(*ii*) प्रातिपदिकार्थ .............................. प्रथमा स्यात्।

(4/1920)

प्राश्निक कोड क्र. 4/1920

पृष्ठ क्र. – 1

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :– पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय

विषय अनिवार्य संस्कृतम् विषय कोड 801 माध्यम संस्कृत

कुल प्रश्न 16

आदर्श उत्तराणि

समय – 3 घण्टा पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | प्रश्नाः खण्डत्रये विभक्ताः। सर्वे प्रश्नाः अनिवार्याः। | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | (खण्ड 'अ') सर्वेषां कृते | |
| 1 – | क – स्वप्नवासवदत्तम् नाटकस्य आसीत् – | 1×5=5 |
| | द – महाकविः भासः। | |
| | ख – स – अष्टौ। | |
| | ग – द – दासः। | |
| | घ – अ – महासेनः। | |
| | ङ – ब – महाराज उदयनस्य द्वितीया पत्नी। | |
| 2 – | क – जगतः | 2×3=6 |
| | ख – सुलभौ | |
| | ग – भुजौ। | |
| 3 – | क – वैदेहीपुत्रः – उदयनः | 2×4=8 |
| | ख – वसुन्धरा – वासवदत्ताधात्री | |
| | ग – मगधराजस्य भृत्यः – भटः | |
| | घ – वसन्तकः – विदूषकः | |
| 4 – | एक पदेन उत्तरम् – | 2×4=8 |
| | क – वासवदत्ता। | |
| | ख – महाराज प्रद्योतस्य। | |
| | ग – पद्मिनिका सहचरी विद्यते। | |
| | घ – धीरललितः नायकः। | |

हस्ताक्षर [signature]

कुल पृष्ठ – 1–13

[signature]

722

प्राश्निक कोड क्रं...........

पृष्ठ क्र.– (2)

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय........................ विषय कोड 801 ........ माध्यम........................

कुल प्रश्न........................

समय – 3 घण्टा

पूर्णांक........................

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| 5– | सूक्ति व्याख्या — | 1×8 = 8 |
| (1) – | उत्तरम् — प्रद्वेषो बहुमानो वा संकल्पादुपजायते । | |
| | सन्दर्भप्रसङ्गौ — | |
| | प्रस्तुतोऽयं सूक्तिः "महाकविभास-प्रणीतस्य" स्वप्नवासवदत्तम्" नाटकस्य प्रथमाङ्कात् उद्धृतास्ति । सुरक्षाऽनया पद्मावत्यां आत्मीयतायाः कारणं समर्थयन् परिव्राजक वेषधारी यौगन्धरायणः आत्मगतमेव विचारयति यदियमेव पद्मावती मे महिषी भूयात् । अतएव एतस्यां पद्मावत्यां मे ~~महिषी~~ महती आत्मीयताऽनुभूयते । महाकविः भासः आत्मीयताविषये कारणमुपस्थापयति यत् — | |
| | व्याख्या — प्रद्वेषः = द्वेषातिशयः, बहुमानः = अत्यादरः, वा = अथवा, संकल्पात् = मानसात् मनोवृत्ति चित्तवृत्तिविशेषादिति, भावः, उपजायते = उत्पद्यते, | |
| | अभिप्रायः — | |
| | यद् विषये यस्य चित्ते यादृशोभाव उत्पद्यते, स तद् भावानुसारेणैव तं प्रद्वेष्टि बहु मन्यते वा । | |
| | प्रद्वेषादरयोः चित्तगतं भावमन्तरेण किमपि कारणान्तरं न सम्भवतीति ॥ | |
| | ॥ इति ॥ | |

हस्ताक्षर........................

723

5 - अथवा

सूक्तिः — "कालक्रमेण जगतः परिवर्तमाना चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः"।

सन्दर्भप्रसङ्गौ —

प्रस्तुतोऽयं सूक्तिः महाकविः भासप्रणीतस्य "स्वप्नवासवदत्तम्" नाम नाटकस्य प्रथमाङ्कस्य उद्धृतोऽस्ति। अत्र तपोवने उत्सारणा रूपा नादरेण व्यथितां वासवदत्तां सान्त्वयन् परिव्राजकवेषधारी यौगन्धरायणः तां प्रति कथयति यत् —

व्याख्या —

युक्तोऽस्ति एव विपर्योऽत्रभवत्या, नात्र चिन्ता कार्या। यतो हि सम्प्रति इयं पद्मावती "इत इतो गच्छतु भवतीति" मार्गस्थलोकोत्सारणापुरस्सरं परिजनैः कृतप्रशंसा यथा यदृच्छया गच्छति, तथैव राज्यसुखमनुभवन्ती पद्मिनाचरित समुदाचारा त्वमपि स्वेच्छया गतासीः। अग्रेऽपि उदयने विजयश्रिया समलङ्कृते सतीत्यमेव गमनसुखमनुभविष्यस्येव।

अतः कार्यगौरवादभ्युपगत भाधुनिक-मीदृशं वेषान्तरस्वीकृतरूपं दशाविशेषमभि-ज्ञसुषी परिभवमात्मनः सम्भाव्य मा तावदिदानीं विमानयस्व इति। इदमेवा-र्थान्तरेण समर्थयति — जगतः = लोकः, कालक्रमेण = समयानुसारं, परिवर्तमाना = विभिन्नरूपतां गच्छन्ती, भाग्यपङ्क्तिः = अदृष्टपरम्परा, चक्रारपङ्क्तिरिव = रथाङ्गा-वयवश्रेणिरिव, गच्छति = व्रजति।

अपमानार्थम् —

यथा चक्रगतान्यराणि —

Date ____
Page ____

क्रमेणोपर्यधो गच्छन्ति दृश्यन्ते, तथैव शुभान्यशुभानि च जनस्य भाग धेयान्यपि समय गत्यानुसारं विपरिवर्तन्त एव, अतो त्वया न मनः खेदनीयमिति ॥

॥ इति ॥

6 — संस्कृतेन उत्तरम — 1×5=5

क — दुःखं न्यासस्य रक्षणम ।

ख — वासवदत्तायाः वीणायाः ।

ग — महाराजोदयनः ।

घ — वत्सराजस्य प्रतिहारिणी ।

ङ — षोडशश्लोकाः ।

7 — अ — संकेतः —

2×5=10

भृत्यैर्मगधराज —— गतो जनः ।

श्लोकोऽयं महाकविभास विरचितस्य "स्वप्नवासवदत्तम" नाटकस्य प्रथमाङ्कात् उद्धृतोऽस्ति ।

व्याख्या —— स्निग्धैः = स्नेहयुक्तैः, आप्तैर्विश्वस्तैरिति भावः, कन्यानु गामिभिः = पद्मावतीपरिचारिकैः, मगधराजस्य = मगधनरेशस्य, दर्शकस्येति भावः, भृत्यैः = सेवकैः, भटैरिति यावत्, तपोवनगतः = आश्रमवस्थः सर्वः = सकलः, बालवृद्धादिः, जनः = तापसलोकः, धृष्टम = अवज्ञासहितम, यथा स्यात्तथेति भावः, उत्सार्यते = दूरीक्रियते, मध्यमार्गादपसार्यते, इति भावः ॥

725

7- अथवा

मधुमदकला ——— वियुक्ता: स्यु: ॥

सन्दर्भप्रसङ्गौ — पूर्ववत् ।

व्याख्या ———

मधुमदकला = पुष्परसमदात्यल मधुरशब्दा, मदनार्ताभि: = कामाकुलाभि:, प्रियाभि = प्रेमवतीभि:, उपगूढा = आश्लिष्टा:, मधुकरा: = भ्रमरा: पादन्यासविषण्णा = चरणनिक्षेपखिन्ना: सन्त इति शेष: । वयमिव = अस्माकमिव, कान्ताविमुक्ता: = सहचरीविरहिता:, स्यु: = भवेयु: ।

---

7 – ब —

तीर्थोदकानि समिध: ——— मेतदस्या: ॥

सन्दर्भप्रसङ्गौ — पूर्ववत् ।

व्याख्या ———

(भवन्त: = तपोवननिवासिन: ), तीर्थोदकानि = तीर्थजलानि, समिध: = पलाशादिकाष्ठखण्डानि, कुसुमानि = प्रसूनानि, दर्भान् = कुशान्, (एतादृशानि) तपोधनानि = तप: साक्षीभूयात् पदार्थान्, वनात् = काननात्, स्वैरम् = इच्छानुसारं, उपनयन्तु = आनयन्तु । हि = यस्माद्धेतो:, धर्मप्रिया = धर्मानुरागिणी, नृपसुता = राजपुत्री, (पद्मावतीति भाव:) तपस्विषु = तापसजनेषु, धर्मपीडा = तपबाधाम्, न = नहि, इच्छेत् = वाञ्छेत्, एतत् = धर्माचरणानुकूलम्, अस्या: = राजपुत्र्या: पद्मावत्या:, कुलव्रतं = वंशनियम: (अस्तीति शेष:)

=x=

726

7- ख- अथवा

कातरा ये ----- भुज्यते ॥

सन्दर्भप्रसङ्गौ - पूर्ववत् ।

व्याख्या —

ये = पुरुषाः, कातराः = अधीराः अपि वा = अथवा, अशक्ताः = शक्तिहीनाः असमर्थाः सन्तीति शेषः । तेषु = अशक्तपुरुषेषु उत्साहः = अध्यवसायः न जायते = नोत्पद्यते । हि = यतः, प्रायेण = बहुधा, नरेन्द्र श्रीः = राज्य-लक्ष्मीः, सोत्साहैरेव = उत्साहसम्पन्नैरेव पुरुषैः, भुज्यते = उपभुज्यते, आस्वाद्यतेति भावः ॥

=x=

(२४०३ "क")

(व्याकरणछात्राणां कृते न्यायसिद्धान्तमुक्तावल्यां प्रश्नाः)

8 — एकपदेन उत्तरम् — 1×10=10

I — लक्षितस्य लक्षणं सम्भवति न वेति विचारः परीक्षा ।

II — सप्त पदार्थाः ।

III — अतीतादिव्यवहारहेतुः कालः ।

IV — रसनाग्राह्यो गुणो रसः ।

V — घ्राणग्राह्यो गुणो गन्धः ।

VI — संयोगसन्निकर्षः ।

VII — रसः षड्विधः ।

VIII — लिङ्गं त्रिविधम् ।

IX — अपां शरीरं वरुणलोके ।

X — कालः एक एव ।

(801) ⑦

Date ______
Page ______

प्र- 1- 5×3=15

पदार्थ भेदा: —

द्रव्यगुणकर्मसामान्यविशेषसमवायाभाव - भावा: सप्त पदार्था: ।

पदकृत्यम —

तत्रेति । तत्र = सप्तपदार्थमध्य इत्यर्थ: । द्रव्याणि नवैवेत्यन्वय: । एवं तत्र इति पदं "चतुर्विंशति गुणा" इत्येनापि अन्वेति । द्रव्यत्वजातिमत्वं समवायिकारणत्वं वा द्रव्यसामान्यलक्षणम् ।

— II — संयोग लक्षणम् —

संयुक्तव्यवहारहेतु: संयोग: । सर्वद्रव्यवृत्ति: ॥

पदकृत्यम —

"इमौ संयुक्तौ" इति यो व्यवहार:, तस्य हेतु: संयोग इत्यर्थ: । दण्डादिवारणाय संयुक्तव्यवहारेति । कालादिवारणाय 'असाधारणेत्यपि' देयम । संयुक्तव्यवहारत्वेऽतिप्रसक्तिवारणाय हेतुरिति । उपदर्शितलक्षणचतुष्टये 'असाधारण' पदं देयम क्वचित्पुस्तके परिमाणपृथक्त्वेलक्षणे ईश्वरेच्छादिवारणाय असाधारणेति दृश्यते, तत्तु आधुनिकैर्न्यस्त मिति बोध्यम् ॥

— III — अपां लक्षण —

शीतस्पर्शवत्य: आप: ।

तद्भेदा: — ता द्विविधा: —

नित्या अनित्याश्च । नित्या परमाणुरूपा । अनित्या कार्यरूपा । पुनस्त्रिविधाः — शरीरेन्द्रियविषयभेदात् । शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनं जिह्वाऽग्रवर्ति । विषयः सरित्समुद्रादिः ॥

— IV — चक्षुर्मात्रग्राह्यो गुणो रूपम् ।
तच्च शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्रभेदात्सप्तविधम् ।
पृथिवीजलतेजोवृत्तिः । तत्र पृथिव्यां सप्तविधम् । अभास्वरशुक्लं जले ।
भास्वरशुक्लं तेजसि ॥ इति ॥

10 — I — 5×5=25

(1) - वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ ।
स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम् ॥

II — कालनिरूपणम् — आकाशीयमिन्द्रियं स्पष्टयति इन्द्रियमिति । एकः आकाशः उपाधितः उपाधेः कर्णशष्कुल्यादेः पञ्चमपास्तासित ।
क्रमप्राप्तं कालं लक्षयति जन्यानामिति । परिस्पन्दः क्रिया । न सम्भवतीति । द्रव्ययोरेव संयोग इति नियमात् । काल एवेति । स्वाश्रयसूर्यसंयोगि संयोग सम्बन्धः स्वम् सूर्यक्रिया, तदाश्रयः सूर्यः, तत्संयोगी कालः, तत्संयोगो परोऽर्थो इति इदानीम् भट इदानीं घट इत्यादौ एतत्सम्बन्धघटकतया कालः कल्पनीयः । इत्थं चेति । निरुक्तरीत्या कालस्य सिद्धौ ॥ इति ॥

729

(801) ⑨

Date ____
Page ____

3 — आत्मनिरूपणम् —

आत्मानं निरूपयति आत्मेन्द्रियेति। आत्मत्वजातिस्तु सुखदुःखादिसमवायिकारणतावच्छेदकतया सिद्ध्यति। ईश्वरेऽपि सा जातिरस्त्येव। अदृष्टादिरूपकारणाभावान्न सुखदुःखाद्युत्पत्तिः नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भाव इति नियमस्याप्रयोजकत्वात् ॥ इति।

4 — अनुभूतिनिरूपणम् —

विभुत्वं परममहत्त्ववत्त्वम्। तच्च सर्वमुक्तमपि स्पष्टार्थमुक्तम्। बुद्ध्यादीति। बुद्धिसुखदुःखेच्छादयश्चतुर्दश गुणाः पूर्वमुक्ता वेदितव्याः। अत्रैव प्रसङ्गात् बुद्धेः कतिपयं प्रपञ्चं दर्शयति बुद्धिस्त्विति। द्वैविध्यं व्युत्पादयति अनुभूतिरिति। अनुभूतिश्चतुर्विधेति। एतासां चतसृणां करणानि चत्वारि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रोक्तानि वेदितव्यानि ॥

॥ इति ॥

5 — अलौकिक व्यापारः —

"अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः।

एवं प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम्। तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षो वर्णितः। अलौकिकसन्निकर्षस्त्विदानीमुच्यते अलौकिकस्त्विति। व्यापारः सन्निकर्षः। सामान्यलक्षणेति।

॥ इति ॥

P.T.O

730

(801)

18

Date
Page

6 - क्रियां जाति योग्य ___ भूतरूपयो: ॥

योग्येति । पृथक्त्वादिकमपि योग्यव्यक्तिवृत्तितया बोध्यम् । तादृश: योग्यव्यक्तिवृत्तिरित्यर्थ: । चक्षुर्योग्यत्वमेव कथं तदाह गृह्णातीति । आलोकसंयोग उद्भूतरूपं च चाक्षुष प्रत्यक्षे कारणम् । तत्र द्रव्यचाक्षुषं प्रति तयो: समवाय सम्बन्धेन कारणत्वम् । द्रव्य समवेत रूपादि प्रत्यक्षे स्वाश्रय समवाय सम्बन्धेन ।
द्रव्यसमवेत समवेतस्य रूपात्वादे: प्रत्यक्षे स्वाश्रय समवेत समवायसम्बन्धेनेति ॥

॥ इति ॥

("खण्ड - "स")

(उपाकरणेतरच्छात्राणां कृते लघुसिद्धान्तकौमुद्या: प्रश्ना:)

11 - 1 - स्वतंत्र: । 1×5=5
2 - चतुर्दश: ।
3 - द्वन्द्व: ।
4 - पाणिनि: ।
5 - द्वितीया ।

12 - 1 - पंचमी 1×5=5
2 - करणम्
3 - स्वाहा
4 - पञ्चधा
5 - लृट्

13 - प्रश्ना: समाधेय: 2×5=10
13 - 1 - हेतु हेतुमतो: "लिङ्" लकार: भवति ।
2 - कारक: इत्यत्र अकादेश विधायक सूत्रं "युवोरनाकौ" अस्ति ।
3 - द्वन्द्व समास विधायकं सूत्रं अस्ति —

731

(801)

(11)

Date ______
Page ______

" चाइर्थे छन्दः " /

4- प्रथमा विभक्ति विधायकं सूत्रं "प्रातिपदिकार्थ... इत्यादि सूत्रं अस्ति /

5- सम्प्रदानविधायक सूत्रं अस्ति — "चतुर्थी सम्प्रदाने" /

14- 1- हरिं भजति — 5×4=20

अत्र भजन क्रियया सम्बद्धं देवतादि कर्तुरत्यन्तेच्छाविषयभूतस्य हरेः "कर्तुरीप्सिततमं कर्म" इत्यनेन कर्मत्वात् "कर्मणिद्वितीया" इत्यनेन द्वितीया भवति /

हरिः सेव्यते इत्यत्र तु 'षेवृ सेवने' इत्यस्मात् कर्मणि लटो विधानात् तत्र कर्मणो हरेरुक्तत्वात् प्रथमैव न तु द्वितीया / इति //

2- भावयति —

भू धातोः हेतुमति च इति प्रेरणार्थ णिचि अनुबन्धलोपे 'अचो ञ्णिति' इति वृद्धौ आवादेशे 'सनाद्यन्ता धातवः' इति धातुत्वाल्लटि तिपि शपि अनुबन्धलोपे गुणे अयादेशे भावयति / इति सिद्धम् //

3- भाव्यते —

भू धातोर्णिचि वृद्धौ आवादेशे 'भावि' इति / तस्मात् कर्मणि 'भावकर्मणोः' इत्यात्मनेपदे लटस्त-प्रत्यये टेरेत्वे 'सार्वधातुके यक्' इति यकि 'णेरनिटि' इति णिलोपे "भाव्यते" इति सिद्धम् /

P.T.O

32

(801) (12)

4- तायते —
तन धातोः कर्मणि लट् स्त प्रत्यये यकि 'तनोतेर्यकि' इत्यात्वे सवर्ण-दीर्घे "तायते' इति।
आत्वाऽभावपक्षे 'तन्यते' इति॥

5- दायिता —
दा धातोः कर्मणि आत्मनेपदे लुट् स्त प्रत्यये तासि 'स्यसिच् सीयुट' इति च्चिण्वदिटि 'आतोयुक् च्चिण्कृतोः' इति युकि आदेशे ङित्वासामर्थ्यादभ-स्यापि टेर्लोपे 'दायिता' इति सिद्धम्।

6— देवस्यापत्यमिति विग्रहे 'देवाद्यञ्ञौ' इति यञि आदिवृद्धौ अलोपे विभक्ति कार्ये तत्सिद्धिः॥

7— दैत्यः —
दितेरपत्यमिति विग्रहे दिति शब्दात 'दित्यादित्यादित्य-पत्युत्तरपदाण्ण्यः' इति ण्य प्रत्यये आदिवृद्धौ इलोपे विभक्ति कार्ये तत्सिद्धिः। इति॥

15— ① — समसनं समासः कथ्यते। 1x8=8
2 — वृत्यार्थावबोधकं वाक्यं विग्रहः कथ्यते।
3 — वैनतेयः।
4 — वाचोऽग्मिनिः इत्यनेन।
5 — 'हलो यमां यमि लोपः' अनेन सूत्रेण
6 — 'शिवादिभ्योऽण्'
7 — शब्दायते इत्यत्र 'क्यङ्' प्रत्ययः।

733 P.T.O

(801)

(13)

Date
Page 0×5=5

16 —

16 — अव्ययीभावे चाकाले सहस्य सः स्यादव्ययीभावे न तु काले हरेः सादृश्यं सहरि । ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम् । चक्रेण युगपत् सचक्रम् । सदृशः सख्या ससखि । क्षत्राणां सम्पत्तिः सक्षत्रम् । तृणमप्यपरित्यज्य सतृणमत्ति । अग्निग्रन्थपर्यन्तमधीते साग्नि ॥

॥ इति ॥

अथवा

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । नियतोपस्थितिकः प्रातिपदिकार्थः । मात्रशब्दस्य प्रत्येकं योगः । प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये परिमाणमात्रे सङ्ख्यामात्रे च प्रथमा स्यात् । प्रातिपदिकार्थमात्रे - उच्चैः । नीचैः । कृष्णः । श्रीः । ज्ञानम् ॥

॥ इति ॥

—×—

निरीक्षित
मोदनी

434

Date ______
Page ______